
वेदार्थ-कल्पलता

पूर्वपीठिकासहिता

रचयिता

दैवरातः

काशी हिन्दू विश्वविद्यालय
वाराणसी-५



महर्षि दैवरात, गोकर्ण (१८९२-१९७५)

विश्वामित्र गोत्र, विघ्नेश्वर भदाति-नागवेणी सुतः

(Photograph and Life sketch from elsewhere)

Chronology of the Main Events of Daivarata's life.

1.	Birth	**4th Jan. 1892 A.D.**
2.	Upanayana	**1899 A.D.**
3.	Mother's death	**1899 A.D.**
4.	Father introduced the *Ṛgveda*	**1899 A.D.**
5.	Joined the *pathashala* of Krishna Bhat	**1900 A.D.**
6.	Met Ramadasa Swamy	**1904 A.D.**
7.	Ran away from Gokarn to meet Ramadasa Swamy avoiding marriage.	**1905 A.D.**
8.	Returned to Gokarn from his first phase of wanderings with Ramadasa Swamy	**1907 A.D.**
9.	Joined the *haṭhayoga* classes of Balavant Rao	**1907 A.D.**
10.	Marriage with Arundhati	**1908 A.D.**
11.	Met Tembe Maharaj for the first time	**1909 A.D.**
12.	Met Vāsiṣṭha Gaṇapati Muni for the first time	**1910 A.D.**
13.	Served Vāsiṣṭha Muni for more than three years during Muni's stay at Gokarn.	**1910-1913 A.D.**
14.	Went with Tembe Maharaj and Vāsiṣṭha Muni	**1913 A.D.**
15.	Tembe Maharaj died Daivarata's "*Panchagavya Vrata*"	**1914 A.D.**
16.	Met Ramana Maharshi	**1915 A.D.**

17.	Became the Seer of new *mantras*	**1917 A.D.**
18.	Establishment of Ashrama at Gokarn	**1919 A.D.**
19.	Second marriage	**1920 A.D.**
20.	Stayed for two months at Benares Hindu University	**1935 A.D.**
21.	*Veda-vedikā* published	**1957 A.D.**
22.	His Lectures at Benares Hindu University	**1963 A.D.**
23.	Participated in the Vedic conference at Tirupati. Also, presided over the "*Veda-Pariṣat*" at New Delhi, where, he was honoured with the title "*Vidyā-vācaspati*"	**1964 A.D.**
24.	"*Vedavācāspati*" an honorific title conferred upon Daivarata by Bharatiya Vidya Bhavan, Bombay.	**1966 A.D.**
25.	*Chhando-Darśana* published	**1968 A.D.**
26.	Felicitated in Lal Bahadur Shastri Sanskrit Vidyapeetha, New Delhi.	**1970 A.D.**
27.	Visited foreign countries	**1971 A.D.**
28.	*Vāk-sudhā* published	**1972 A.D.**
29.	Met with an accident	**1972 A.D.**
30.	Died	**13th Aug. 1975 A.D.**

Special note : The chronology of Daivarata is prepared on the basis of some published articles and profiles of Daivarata. The book of Tembe Maharaj which is published by Samaj Pustakalaya, Dharwad, helped a lot in this matter. Also, the manuscript of the unpublished biography is the main source for this life-sketch. God willing, a detailed biography of Brahmarshi Daivarata is intended to be published.

ई ॐ श्रीः

वेदार्थ-कल्पलता

पूर्वपीठिकासहिता

वेदमन्त्राणां श्लोकरूपभाष्येण
सङ्कलिता
मन्त्रपाठेन पदपाठेन च युक्ता

रचयिता
दैवरातः

काशी हिन्दू विश्वविद्यालय
वाराणसी–५

प्रकाशक
काशी हिन्दू विश्वविद्यालय
वाराणसी–५

मूल्य—पचीस रुपए

मुद्रक
रवीन्द्रकुमार बेरी
काशी हिन्दू विश्वविद्यालय प्रेस

पूर्वपीठिका

(वेदार्थकल्पलतिका)

विषय-सूची

वेदार्थ-कल्पलता

विषय-सूची

सर्वाण्यपि यन्त्राणिचक्राणि च बिन्दुनैव कल्पयितुं युक्तमितिप्रतीयते, तस्माद् अस्मिन् यन्त्रशास्त्रे त्रिकोणमेकमेव विषभाङ्कचक्रं भवति, इत्यपि सिध्यति।

"त्रिनाभि चक्रमजरमनर्वम्०"

(ऋ० १, १६४, २)

"त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः"

(ऋ० १, २२, १८) इत्यादि त्रिचक्रमराणि

"पञ्चारे चक्रे परिवर्तमाने"

(१३)

"पञ्चपादं पितरं"

इति च (ऋ० १, १६४, १२)

"सप्तचक्रे षळर आहुरर्पितम्"

(ऋ० १, १६४, १३)

"सप्त दिशो नानासूर्याः"

इति च (ऋ० ९, ११४, ३)

कालचक्रे तु षडृतवः प्रसिद्धाः तच्च षट्चक्र-षट्कोणादिरूपमेव, तत्र "सप्तमोऽध्यर्ध-ऋतुः" इति (तै०) वचनात् सप्तर्तुकल्पना सम्पद्यते, तच्चात्रबिन्दुनैव भवितुमर्हति।

"अष्टापदी नवपदी बभूवुषी"

(ऋ० १, १६४, ४१)

"वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशम्"

इति च (ऋ० ८, ७६, १२)

अनेन गायत्रीमन्त्रेण सह ऋग्वेदे तृचस्य पाठात् तद् ऋग्द्वयमपि अत्रैव व्याख्यातम्—तद्विशिष्टार्थपूरणाय, तत्र—

"देवं नरः सवितारं" इति

"नमस्यन्ति धियेषिताः"

(ऋ० ३, ६२, १२)

इति च तदुपासनादि बोधकंवचनंभवति इति विशेषः

॥ षष्ठी कला ॥

॥ पुराकल्पे स्त्रीणां गायत्रीमन्त्रोपदेशसत्त्वम् ॥

अस्मिन् लोके स्त्री-पुरुषौ तावत् समानाधौङ्गिनौ दम्पती भवतः, देवताविशेषे च शक्ति-शिवात्मकौ वाणी-ब्रह्माणौ वाक्-पुरुषौ, वाग्-आत्मानौ, वाग्-ब्रह्मणी, शची-इन्द्रौ

गौरी हरौ, लक्ष्मी-नारायणौ चेति प्रसिद्धौ दम्पतीसत्त्वपूर्णौ-क्षेत्र-बीजस्थानीयौ स्तः, तत्र स्त्री वामार्धरूपा वामनयना, सोमसत्त्वा रसप्रधाना, क्षेत्रात्मिका रसभूमिः प्रजा प्रसवादि धर्मयुक्ता गर्भधारण समर्थाचेति प्रत्यक्षसिद्धैव ।

पुरुषः दक्षिणाङ्गप्रधानः, तेजः सत्त्वस्वरूपः सूर्यात्मकः, दक्षनयनः, बीजात्मकः इति प्रसिद्धः, "इन्धोह वै नामैष योऽयं दक्षिणेऽक्षन्-पुरुषः, अथैतद् वामेऽक्षिणि पुरुषरूपमेषाऽस्य पत्नीविराट्" इति औपनिषदं वचनमेवात्र प्रमाणम्, (बृ० उ० ४, २, २) ।

एवं वामा स्त्री पुरुषोदक्षः, वामे सोमः दक्षे सूर्यः, इति सिध्यति, एवं सर्वत्रापि स्त्री-पुरुषयोः सामान्य सत्त्वेन निर्देशात् तयोः उभयोरपि द्विजत्वसिध्यर्थं गर्भाधानजातकर्मादि वैदिक संस्कारपूर्वकं साजात्ययोगेन पुनः वैदिक धर्मयज्ञादि ब्रह्मकर्मसु अधिकारसिध्यर्थं च उपनयनेन ब्राह्मीविवाहादिना च व्रतादि नियमेन धर्मप्रजासिद्धये च सर्वेऽपि वैदिक संस्काराः विधीयन्ते, येन प्रापञ्चिकं पारमार्थिकं च सम्पत्सुखादिकं दिव्यं फलमपि प्राप्तुं प्रभवेयुः सर्वाः प्रजाः इति सर्वसम्मतं वैदिकं लौकिकं च तत्त्वम् । "ब्रह्मवादिनी" प्रथमतः ब्रह्म-वादिनी लक्षणं प्रदर्शितं पराशरस्मृतौ माधवसंहितायाम्—"या उपनयनं कृत्वा वेदमधीत्य पश्चात् विवाहं करोति सा ब्रह्मवादिनी तथैव "सद्योवधूः" या प्रथमतः उपनयनं कृत्वा सद्यएव विवाहं विधाय ततः वेदमधीते सा सद्योवधूः ॥इति॥

अस्मिन् विषये आक्षेपः—तत्र केचिदेवं वदन्ति–अस्मिन् प्रपञ्चे सम्प्रति प्रचलितेन व्यवहारेण, तदनुसारेण शास्त्रादिविधिवचनकल्पनेन च स्त्रीणां उपनयन-वेदाध्ययनादिषु वैदिकेषु संस्कारेषु तथा देवयजनादिषु च नास्त्येवाधिकारः, "स्त्री शूद्र द्विजबन्धूनां त्रयी न श्रुति-गोचरा" इति स्त्रीणां वेदमंत्रादिश्रवणनिषेधात् । तस्मात् तासां पतिसेवा मात्रमेव प्रधानम्, "स्त्रीभिर्भर्तृवचः कार्यमेषधर्मः सनातनः" इति तद्विधानाच्च, ताथाऽस्तु नाम पतिसेवा विधान मात्रेण कथंवैदिक संस्कारादिविशेषाणां हानिः इति विचारास्पदमेवैतत् ।

तत्र प्रथमतः उपनयनसंस्कारेण उभयोरपि द्विजत्वे सिद्धे पश्चादेव विवाहः, मिथोयोगेन दम्पतीत्वं च सिध्यति, तत्पश्चादेव तस्याः स्त्रियः पतिसेवैव गतिरिति युक्तमेवास्तु इति । किं स्त्रीणामपि उपनयनसंस्कृतिर्विद्यते, तासामपि द्विजत्वसिद्धिरावस्यकीतिसंविद्यते ! अथ किम् !

"पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते ।
अध्यापनं च वेदानां गायत्रीवचनं तथा ॥" इति

तद्विधान दर्शनात् ।

अत्र "वचनात् प्रवृत्तिः, वचनान्निवृत्तिः" इति न्याय्यम् । अस्मिन् वचने स्त्रीणामपि उपनयनं, गायत्रीमन्त्रोपदेशः, वेदाध्ययनं च पुरुषैः समान मेवास्ति विहितम् ।

तत्रापि "इष्यते" इति वर्तमान क्रियायोगात् तत्सामर्थ्याच्च तदिदं सार्वकालोचित-मेवेति प्रतीयते, तत्र वैदिक संस्कारकरणे गुणोदयः प्रत्यक्षसिद्धः शास्त्रेण अनुशिष्टश्च, तत्र अकस्मादेव कथं तत्संस्काराद्यकरणमपि तद्गुणाधाने कारणं भवितुमर्हतीति सङ्गच्छते ।

अत्र एवं शास्त्रविधाने सत्यपि नेच्छन्ति पण्डिताः तासां उपनयनादिवैदिक संस्कारं कर्तुम्, कारयितुं च नानमोदन्ते इति शोचनीयमेवैतत्, सोऽयं धर्मः सनातनः श्रौतएव आर्षेयश्च

शास्त्रविहितत्वात्, "तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ" इति शास्त्रप्रामाण्येन तदभ्युपगमात्, नापि तदेतत् इदानीमेवनूतनतया परिकल्पितम्, वस्तुतः शास्त्रदृष्ट्या युक्तं योग्यं आवश्यकं चैतत् स्त्रीणामपि उपनयनादिकं सद्विद्यादियोग्यता सिद्धि द्वारा सद्धर्माचरणादौ देवादि यज्ञे ब्राह्मीशरीरादि सम्पत्तये सुवीर्यवत्तरधर्मप्रजादिसिद्धयेचेति निर्विवादेन अनिवार्यतया अभ्युपगन्तध्यमेव अथवा मौनेन तदनुमोदनीयम्, अन्ततः तूष्णीमेव स्थातव्यतया आपतेदिति ।

वस्तुतस्तु-अस्मिन् विषये कश्चिदन्य एवास्ति कल्पः समाधानकारकः ।

पुराकल्पो नाम प्राचीनः पुरातनः श्रौतः कल्पः "शिक्षाकल्पो व्याकरणम्" इति कल्पस्य वेदाङ्गरूपत्वेन निर्देशात् ।

श्रोतेकल्पे तु स्त्रीणामुपनयनादिकं विहितं युक्तमेवेतितदर्थः, श्रौते यज्ञादिकल्पे दम्पत्योः समानाधिकारेण इदानीमपि तदनुष्ठानदर्शनात्, तत्र सर्वेषामपि विदुषां अभ्यनुज्ञा अस्ति, तत्र शास्त्रीयसत्त्वविमर्शनात् सुनिर्णीतं स्त्रीणामपि वैदिकधर्मकर्मादिषु अधिकारसत्त्वम् इति ।

अथ पुनः पुराकल्पः सः कल्पान्तरविषयकः युगान्तरविशेषार्थकः इत्यभिमतेऽपि, तस्य सत्ययुगादिबोधकत्वेऽपि तदिदं समानमेव भवितुमर्हति" कथम् –तत् सङ्गच्छते,—यदि तदानीं तासामुपनयनादिकमासीदिति अभ्युपगम्यते तर्हि ततः पश्चात् कदा केन प्रमाणेन केन विशिष्टतरकारणेन अकस्मादेव वा केन मुनिना आचार्येण सः निषिद्धः, इति विचारास्पदमेव, स्मार्ते कल्पे प्रतिषिद्धः उत्तरत्र असामर्थ्यात् अतिप्रसक्ति प्राचुर्यात् अनर्थादि प्रसङ्ग सम्भवार्थाच्चेति चेत् नैतदपि प्रामाणिकं वचनम्, स्मृत्यादिग्रन्थेष्वपि प्रत्यक्षं वचनं न दृश्यते, उपनयनादि विधायके गृह्य सूत्रादिके ब्रह्मकर्मानुष्ठानादि विषयके च शास्त्रीयके ग्रन्थै तद्विषयनिषेधवचनं तु मृग्यमेव कलिनिषिद्धेऽपि स्त्रीणामुपनयनमेव-निषिद्धम् । एतावत् पर्यन्तं यत्र कुत्रापिनोपलब्धं इति प्रतिज्ञायते, अत्र केचि देवमूचुः—स्त्रीणां रजस्वलादि समये गर्भधारणादिविशिष्टविषये प्रसवादिके च अशुचिकर आपत्त्यादिप्रसङ्गेऽपितद्वैबिककर्मानुष्ठानस्य अशक्यत्वात् अयोग्यत्वात् अनौचित्याच्चकेनापि निषिद्धं भवेदिति, नैतत् प्रमाणसिद्धं युक्तिसहं च भवितुमर्हति, एवमेतत् तु तदानीमपि समानमेवासीदिति मतिमतां अज्ञानामपि सम्मतं सर्वविदितमेव, न तु तदिदमिदानीमेव नूतनतया कल्पितं-प्रचालितं प्रचारार्थं नूतनैर्लौकिकैर्व्यावहारिकैरितिसिद्धमेव, अपि च यदा तु तासां तत् वैदिक संस्कारादिकमपि अस्मिन्नेव लोके अस्यामेव आर्षेयजनतायां अप्रतिहतं नित्यं प्रचलितमासीत् इति अभ्युपगम्यते, तत्र इदानीमेव कथं केन आनीता नवीनतान्यूनताचेति न ज्ञायते ।

एवमेव अन्येषु गर्भाधान-जातकर्मादिषु अन्त्येष्टिपर्यन्तेषु षोडशसु संस्कारेषु मध्ये सर्वप्रधानं तदिदमुपनयनमेकमेव कथमकस्मान्निषेधमर्हति, किं तेन बाधकम्, किं पुनरपराद्धं तेन उपनयेन, प्रथमतः प्रधानाद् वैदिकसंस्काराद् विरहिताः ता एताः स्त्रियः पश्चात् उत्तरत्र गृहिणीधर्मे स्थिताः सत्यः कथं पुनः नित्यहोमादिषु धर्मकार्येषु यज्ञादिषु अधिकारार्थमर्हेयुः, इति चिन्त्यमेवैतत् ।

अपि च पुरुषां सर्वेषामपि प्रायेण स्वाभीष्टार्थाभिप्रायेण प्रापञ्चिकेषु सर्वेष्वपि कार्येषु गृहिणी अत्यन्तमावश्यकी अर्धाङ्गिनी प्रीतिपात्रयोगिनी गृहकृत्यादिनिर्वाहिनी यज्ञादि वैदिक-

धर्मकर्मानुष्ठाने सहकारिणी सहधर्मचारिणी इति उच्यते, तथैव सत्सन्तानोदये विशिष्टतरानेक रसमय विविधसुखोपभोगादि विषये सेयं स्त्री सर्वात्मना समाश्रयणीयैवेति प्रत्यक्षसिद्धमेवेति न पुनर्वक्तव्यमापतेदिति मन्ये ।

तत्र मूलतः असंस्कृतैव सतीसेयं नारीमणिः जायापदेस्थातुं पुरुषस्य सर्वमप्यभीष्टं निर्वर्तयितुं यथोक्तं ध्येयं साधयितुं च कथं प्रभवेदित्येव विचारास्पदमेव, "गृहिणी गृहमुच्यते" इति वचनं प्रसिद्धम्, "यान्त्येवं गृहिणीपदं युवतयो धन्योगृहस्थाश्रमः" इति कवीन्द्रोदितं सत्यमेव परं तत्त्वार्थकं वचनम्,

अपि च तदिदं लौकिकमपि शास्त्रीयमेवेति सर्वविद्वन्मतं निर्विवादसत्त्वान्वितम् इति न पृथग् वक्तव्यम्,

अत्र यस्याः सकाशात् शरीरात् सत्सन्तानोदयं कामयन्ते पुरुषाः, तस्याः असंस्कारः कथं सत्सन्तानकारणपरः स्यात् इत्यपिचिन्त्यमेव, तन्मनोरथ मात्रमेवेति भावः, अपि च शारीरके आयुरारोग्य बलवीर्यादिके विषये स्त्रीणां सत्संस्कृतिमभिमन्यमानाः तथा कामयमानाः तदनुरोधेन प्रयतमानाः तथा तच्चिकित्सादिमुखेन प्रवर्तमानाश्च सन्तः पुरुषाः कथं सूक्ष्ममान्तरतमं दिव्यं वैदिकं संस्कारं सुवीर्यत्वादिकारणं ब्राह्मीशरीरसम्पदादिसिद्धिमूलभूतमपि नाभिलषन्ति, नापि तत् कर्तुं कारयितुं च प्रवर्तन्ते इति विचित्रतर मेवैतत्,

॥ वेदे जायापदस्य गौरवम् ॥

अथ वेदोपनिषदादौ तु जाया पदस्य गौरवं श्रेष्ठत्वं वस्तुसिद्धं महत्त्वं, शास्त्रीयं विशिष्टं तत्त्वं च महता गम्भीरार्थेन सहस्रशः स्थानेषु समर्थितमनुश्रूयते, तथा च ऋङ्मन्त्रवर्णः पराशरार्षेयः,—

"जायेव यो नावरं विश्वस्मै"

इति, (ऋ० १, ६६, ५)

तस्यायमर्थः—यथा इयं जाया-स्त्री अस्मिन् प्रपञ्चे योनौ-योनिसम्बन्धिनि सन्तानोदयादिविषये विशिष्ट प्रेमरसोपभोगानन्दादिविषये च बाह्ये गृहविषयके च विश्वस्मै—सर्वस्मै प्रयोजनाय सर्वाभीष्टार्थसिद्धिफलोदयाय अरं—अलं—प्रर्याप्तं भवति प्रभवति, तद्वदेव अयं गृहपतिरूपेण प्रतिष्ठितः अग्निरपि सर्वस्मै फलाय कल्पते इति,

अत्र "प्रजातिरमृतमानन्द इत्युपस्थे"

(तै० भृ० उ० १०, ३)

"सर्वेषामानन्दानामुपस्थ एकायनम्"

(बृ० उ० ४, ५, १२)

इति च प्रसिद्धमौपनिषदं वचनम्, "उपस्थश्च आनन्दयितव्यं च" इति च,

(प्र० उ० ४, ८)

एवं पुरुषस्य स्त्रीद्वारैव बहुधाभावेन पुत्र-पौत्रादिरूपेण आविर्भावसत्त्वम्, तत्सन्ततेर्मुखेन तदविच्छेदेन तस्य अमृतत्वम्, तेनैव च एतद्विश्वचक्रस्यापि सन्ततगतित्वं च सिध्यतीति वैदिकं तत्त्वम्, तदिदं लौकिकं विश्वव्यवहारप्रसिद्धं प्रत्यक्षसिद्धं चेति निर्विवादम्,

"पुरुषेहवा अयमावितोगर्भोभवतिः यदेतद्रेतः; तद्यदास्त्रियां सिञ्चति अथैनञ्जनयति; साऽस्यैतमात्मनमत्रगतं भावयति। सा भावयित्रीभवयितव्या भवति, तंस्त्रीगर्भंबिभर्ति, स यत्कुमारं जन्मनोऽग्रेऽधिभात्रयति आत्मानमेवतद्भावयति, एषां लोकानां सन्तत्यै, एवं सन्तताहीमेलोकाः"

इति "स्पष्टोऽर्थः" (ऐ० उ० २, ४, १-३)

अतएव तत्पुत्रप्रसवादनन्तरं तन्मातरं स्वजायां स्वसन्तानाभिवृद्धे रभिनन्दनार्थं तत्स्वाभीष्टार्थध्येयसिद्धेरानन्देनतत्प्रोत्साहनार्थं भर्तारः तां अभिमन्त्रयन्ते तन्मन्त्रवर्णानुवचनपूर्वकम्,

"अथास्य मातरमभिमन्त्रयन्ते,
इलाहऽसिमैत्रावरुणीवीरेवीरमजीजनत्।
सा त्वं वीरवती भव याऽस्मान् वीरवतोऽकरदिति"॥

(बृ० उ० ६, ४, २८)

हे जाये! त्वं इला—पृथिवीरूपा असि, मैत्रावरुणी-मित्रावरुणात्मकदिव्यतेजो रसयुक्ता, हे वीरे! या इयं वीरं-पुत्रं अजीजनत्-प्रासूत, अतः सा त्वं वीरवतीभव, या इयं सम्प्रति महता श्रमेण तपसा अस्मान् इमान् पुरुषान् वीरवतः—वीर्ययुक्तान् प्रत्यक्षसिद्धान् अकरोत्, अनेन पुत्रप्रसवेन त्वं धन्या इति, तदेतदेव जायायाः प्रधानं लक्षणं भवति—यत् खलु पत्युः पुत्ररूपेण बहुधाभावेन जनयितृत्वमिति प्रसिद्धम्,

"तज्जाया जायाभवति (यद्) तदस्यां जायते पुनः।
आभूतिरेषा भूतिर्बीजमेतन्निधीयते"॥ **इति,**

(ऐ० ब्रा० ५० ७,)

यस्मात् कारणात् पुरुषः पतिः अस्यांनार्यां रेतोरूपेण प्रविष्टः सन् पुनः स्वेनैव अन्तरात्मसत्त्वेन स शरीरेण सचेतनेन स्वयमेव जायते, तदेतदेवजायायाः जायात्वम्, तज्जनयितृत्वमितिभावः॥ इयमेव आभूतिः-पुत्रादिरूपेणः व्याप्तिः, इषाभूतिः-महदैश्वर्यरूपा सन्तानसम्पत्तिः, यत् खलु पुरुषेण आत्मनः सन्ततभावाय वीजं वीर्यरूपं तेजः नार्यां जायायां निधीयतेनिधिरूपेण संस्थाप्यते, अतएव "आत्मावै पुत्रनामाऽसि" **इति प्रसिद्धं वचनं तदर्थं तत्त्वं च,**

तदेतदेव स्पष्टार्थरूपेण प्रतिपादितम् औपनिषदं वचनम्, "पुरुषेहवा अयमादितोगर्भोभवतियदेतद्रेतः तदेतत् सर्वेभ्योऽङ्गेभ्यस्तेजः सम्भूतमात्मन्येवात्मानं बिभर्ति। तद्यदास्त्रियां सिञ्चति अथैनञ्जनयति, तदस्यप्रथमं जन्म" **इति॥**

(ऐ० उ० २, ४, १)

अतएव विवाहे वधू-वरयोराशीर्वादमन्त्रः वधूमुखेन वीरपुत्र-प्रसवार्थं कल्पते"

"वीरसूर्देवकामा स्योना शंनो भवद्विपदे शं चतुष्पदे"

इति, (१०, ८५, ४४)

तदेतदेव स्पष्टतरार्थेन मुक्तकण्ठेनाहयाज्ञवल्क्यः—तत्रायं जायतेस्वयम्" इति "जाया-शब्दनिर्वचनार्थम्"

तस्यायं समग्रः श्लोकः—

"यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः ।
नैतन्ममगतं यस्मात् तत्रायं जायतेस्वयम्" ।। इति ।। (या० स्मृ०)

वैदिकसंस्कारेण संस्कृतायां द्विजस्त्रियामेव द्विजातीय प्रजाप्रसवितृत्वसत्त्वं भवति, न तु असंस्कृतायाः सकाशात् तद्द्विजत्वसत्त्वयुक्तसतप्रजाप्रसूतिर्भवितुमर्हतीति, एतेनापि याज्ञवल्क्यस्येदमभिप्रेतमिति गम्यते, स्त्रीणां द्विजत्वसिध्यैव विवाहादिना द्विजातीय सन्ततिप्रसूतिरेव युज्यते इति ।।

तदेतदुपनिषद्वचनोदितेन तत्त्वार्थेनापि सङ्गच्छते,—तथाहि—"अथ ह याज्ञवल्क्यस्य द्वेभार्ये बभूवतुः मैत्रेयीच कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव" इति ।

तत्र धर्मशास्त्रोक्तं ब्रह्मवादिनीलक्षणं पूर्वं दर्शितमेव-उपनयनं कृत्वा वेद मधीत्य विवाहं कुर्वाणा ब्रह्मवादिनी इति, सेयं तस्याः अनुरूपा अनुगुण्यासञ्ज्ञा, ब्रह्मशब्दस्य वेदार्थकत्वात्, तस्याः अधीतवेदत्वाच्च ब्रह्मवादिनीति च युक्तमेव, ततोऽपीदं विष्टसत्त्वकं ब्रह्मवादिनीत्वं मैत्रेय्याः, तस्याः ब्रह्मात्मज्ञानेऽपि विविदिषादि प्रवृत्तिदर्शनात् । "सा हो वाच मैत्रेयी ये नाहं नामृतास्यां किमहं तेनकुर्याम्, इति, यदेव भगवान् वेद तदेव मे ब्रूहीति, तदनुवचनात्" (बृ० ४, ५, ४) ततश्च उत्तरत्र तस्यै आत्मदर्शनादि—तत्त्वोपदेशश्च अनुश्रूयते ।

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।
मैत्रेयि आत्मनि खल्वरे दृष्टे श्रुते मते सर्वमिदं विदितम् ।।"

इति च (बृ० उ० ४, ५, ६)

।। स्त्रीणां मातृत्वम् ।।

एवं स्त्रीणामेव तासां तदिदं मातृपदं निसर्गतः प्राप्तं सर्वेभ्यः श्रेष्ठतमं पदं भवति, तच्चस्वतः सिद्धमपि सत्पुत्रादि प्रसवेनैव सार्थकतां प्राप्नोति, तदेवता सा अस्मिन् प्रपञ्चे महद् गौरवास्पदं स्थानम् गुरुत्वे देवत्वे गृहिणीत्वे जायात्वे च प्रभवति । "मातृ देवो भव । पितृ देवो भव" (तै०) इति श्रुतिशासनमुखेन तदुपदेशात् । एभ्यो माता गरीयसी" (या० स्मृ०) ।

माता गौरवेणाति रिच्यते (मनु०) इति च तदनु स्मरणम् । "जननी जन्म भूमिश्च स्वर्गादपि गरीयसी" इति स्पष्टोऽर्थः, न मातुः परदैवतम्" इति च मातुः परदेवतात्वं प्रसिद्धम्, "माता प्रत्यक्ष देवता" इति च तस्याः प्रत्यक्षदेवतात्वमपि, सर्वत्र समानमेव भवितु मर्हतीति-निर्विवादम् ।

।। पुराकल्प शब्दस्यवास्तविकं अर्थान्तरम् ।।

वस्तुतस्तु पुराकल्प शब्दस्य वास्तविकं अर्थान्तरमेव शास्त्रीयं वैदिकतत्त्वप्रधानं भवति, तदेवात्रयुक्त तरमिति कल्पते, अत्र उपनयनादि वैदिक संस्कारादि प्रकरणसामर्थ्यात् ।

तत्र कल्पशब्दः वेदाङ्गे प्रसिद्धः श्रूयते-उपनिषदि अपराविद्यायाम्—"तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदः अथर्ववेदः शिक्षाकल्पो व्याकरणं निरुक्तं छन्दोज्योतिषमिति" (मु० उ० १, १, ५) ।

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते" इति तस्य वेदाङ्गत्वम्, श्रौतादि सूत्राणामपि कल्पत्वेन प्रसिद्धिः विद्यते, "अथातः पशुकल्पः" (बौ० श्रौ० सू०) इत्यादि निर्देशात्। तथैव गृह्यसूत्रादीनामपि कल्पत्वमस्ति, "उक्तानि वैतानिकानि गृह्यानिवक्ष्यामः" इति (आ० गृ० सू० १, १) एन यो रुभयोऽपिकल्पयोः मूलभूतः ब्राह्मणकल्पः, मूलतः वेदे पठितानां ऋगादीनां मन्त्राणां यज्ञादिषु विनियोगार्थं प्रवृत्तः, तद्यज्ञीयसंस्थादीनां कल्पकः, सोऽपि प्राधान्येनश्रौतकल्प एव, यस्यैव समाश्रयेण सर्वेऽपि कल्पाः कल्पिताः, तेषामेतेषां सर्वेषामपि कल्पानां पुरातनः सश्रोतकल्प एवेति प्रतीयते, तस्मिन् पुरातने श्रौतकल्पे स्त्रीणां उपनयनादि वैदिक संस्कार विधानं इष्यते, तदिदानीमपि अप्रतिषिद्धं सत् अग्निहोत्रादिषु यज्ञीयेषु श्रौतकर्मादिषु च पूर्वाचार्याणामाचारपरागतं प्रचलितं दृश्यते, तत्र स्त्रीणां मुखेन वेद मन्त्रादिपठनं, होमादेरनुष्ठानं च प्रचलति, तदेतत् श्रौते वैदिके यज्ञादौ स्त्रीणां स्थानं प्रसिद्धमेव, पत्युरसन्निधौ प्रदेशान्तरगमनेऽपि पत्न्या एव नित्यहोमाद्यनुष्ठाने विधानं शास्त्रसिद्धमेव, "पत्नी-कुमारः कुमारी अन्तेवासी ऋत्विजः" इति, (आ० गृ० प० सू०) तत्तु यथापूर्वमेव इदानीमपि समानम्।

श्रौते यज्ञीये दर्शपूर्णमासादौ इष्टिविशेषे तु व्रतादिहवनम् पत्न्या यजमानेन समानमेव, तदसन्निधावपि पत्न्यैवतद् व्रतादि हवनं एकाकिन्यैव—अनुष्ठीयते, तथा आज्यावेक्षणादावपि दृश्यते।

व्रतहोमे—अग्ने व्रतपते व्रतं चरिष्यामि" इत्यादिभिः चतुर्भिः मन्त्रैः समिधाधानं विधीयते पत्न्याः अपि, अपि च आन्त्यमिदं प्रमाणं यत् यज्ञपत्नीस्वयमेव प्रजापति।

सुप्रजसस्त्वावयँ सुपत्नीरूपं सेदिमा अग्ने सपत्न दम्भन मदब्धासो अदाभ्याम्। इन्द्रीणावाविधवा भूयासम्। अदितिरिव सुपुत्रा। अस्थूरि त्वा गार्हपत्येनोपनिषदे सुप्रजास्त्वाय॥"

इति (तै० सं०)

सोऽयं मन्त्रस्तु यज्ञपत्न्या एव एकाकिन्याः प्रजपार्थे विनियुक्तः

अत्र केचि देव माहुः—स्त्रीणां मन्त्रपठने होमादिकरणे च यज्ञादौ श्रौते स्मार्ते वा कर्मणि तावन्मात्रमेवाधिकारोऽस्तु नान्येषां मन्त्राणां पठने नार्यो नार्हन्ति इति, नैतदपि शास्त्रीयं समाधानवचनं भवितुमर्हति।

कुतः एतत्—उच्यते-उपनयनं विना आदितः गायत्री मन्त्रोपदेशे मन्तरेण अन्येषामपि येषां केषां चिदपि वेद मन्त्राणां उच्चारणे नास्त्येव तासामधिकार इति वस्तुसिद्धमेव, यथा पुरुषाणाम्, तथैव अन्यदपिवदन्ति अन्येकेचित्—यज्ञादिषु पुरुषेण पत्यासहैववैदिककर्मानुष्ठाने स्त्रीणामास्तांतावत्, न तु तत् स्वतन्त्रतया तासां भवितु मर्हतीति, तत् तु सर्वथैव युक्ततरम्।

यतः—न तु केवले वैदिके मन्त्रे यज्ञकर्मणि वा पत्यासह योगेनाधिकारः किं तु जायात्वे दम्पतीत्वे लौकिकेऽपि विषये धर्मप्रजादिसिद्धयेऽपि पत्यासहैव स्त्रीणां अधिकारः न तु एकाकिन्याः इति सर्वात्मना वस्तुसिद्धमेव सर्वत्रापि सुप्रसिद्धं सर्वेऽपिजानत्येव, तदिदं सर्वं उपनिषद्वचनेनापि समर्थितम्—"उदपात्रं पूरयित्वा तेनैनामभ्युक्षति," उत्तिष्ठातो विश्वावसोऽ-

न्यामिच्छप्रपूर्व्यां संजायां पत्या सहेति, "अथैनामभिपद्यते" अमोऽहमस्मि सात्व्ँ सात्वमस्यमोऽहं सामाहमस्मिऋक्त्वं द्यौरहं पृथिवीत्वं तावेहिसंरभावहै सहरेतोदधावहै पुंसे पुत्रायवित्तये" इति। (बृ० उ० ६, ४, १९-२०)

तथाऽस्तु तर्हि श्रौतकल्पे सर्वं युक्ततरं युक्ति सहं चेति उच्यतां नाम, स्मार्तकल्पेतु निषिद्धमेव तत्, स्त्रीणामुपनयनम्, इति प्राप्तम्, तथाहि—

"गर्भाधानमृतौपुंसः सवनं स्यन्दनात् पुरा।
षष्ठोऽन्नप्राशनं मासि चूडा कार्यायथाकुलम्।
तूष्णीमेताः क्रियास्त्रीणां विवाहस्तु समन्त्रकः॥

इति (या० स्मृ० २)

अत्र गर्भाधानादीनां तूष्णीं कर्तुं विधानात्-विवाहस्य समन्त्रकस्य दर्शनाच्च पूर्वषाम-मन्त्रकत्वं उक्तं भवति इति सम्पद्यते, तत्र चौलानन्तरं विवाहस्य निर्देशात् मध्ये विद्यमानं उपनयनं तासां नास्तीति अभिप्रेतमित्यपिगम्यते, अथवा गर्भाधानादिवत् उपनयनमपि अमन्त्रकमेव अस्तु इति च ऊह्यते, अत एव "वैवाहिको विधिस्त्रीणामौपनायनिकः स्मृतः" इति (म० स्मृ० २) मनुवचनेन तासां विवाह एव तासामुपनयनस्थानीयो भवतीति समाधातु-मपिशक्यम्।

एवं नारीणांतदुपनयनं अमन्त्रकमेवास्तु, अर्थात् नास्तीतिवा निषेध मुखेन तदभिमन्य-मानः याज्ञवल्क्यः प्रथमतः स्वस्यैव जायायै मैत्रेय्यै उपनिषद्वचनमुखेन सर्ववेद तत्त्वार्थ मूलभूतं आत्मदर्शनं उपादिदेश, "आत्मा वा अरे द्रष्टव्यः० मैत्रेयि आत्मनि खल्वरे दृष्टे श्रुते मते सर्वमपि विदितमिति" इति (बृ० उ० ४, ४, ६) तदेतत् तु कथं सङ्गच्छते इति चिन्त्य-मेवेतिवक्तव्यम्।

तथास्तु नाम जायायै प्रेमवशात् तदुपदेशवचनम्—इति अयताम्, "सहोवाच याज्ञवल्क्यः प्रियावैखलुनो भवती सती प्रियमवृधद् हन्त तर्हि भवति एतद्व्याख्यास्यामि ते व्याचक्षाणस्यतु मेनिदिध्यासस्वेति" इति तस्यैव स्पष्टोक्तिः सङ्गच्छते।

तत्र भवती स्वयं ब्रह्मचारिणीतिसुप्रसिद्धा सती गार्गी तु श्रीराजर्षिजनकमहाराज सभायां बहूनां ब्रह्मविदां वेदवादिनां समक्षमेव याज्ञवल्क्येन सह प्रति स्पर्धितदेव विवादं कुर्वाणा उपनिषद् वचनमुखेन तत्परं तत्त्वं वस्तुस्वरूपं सुश्राव, तेनचतदक्षर ब्रह्मात्मतत्त्वविज्ञान मपि प्रति जग्राह इति अनुश्रूयते, तथाहि–"अथ ह वाचक्नवी उवाच ब्राह्मणाः भगवन्तः! हन्ताहमिमं द्वौ प्रश्नौ पृच्छामि तौचेन् मे वक्ष्यति नवैजातु युष्माकमिमं कश्चिद्ब्रह्मोद्यंजेतेति पृच्छ गार्गीति" (बृ० उ० ३, ८, १) तत्र याज्ञवल्क्यस्य ब्रह्मनिष्ठत्व परीक्षार्थं प्रश्नान् प्रष्टुं ब्रह्मणैरभ्यनुज्ञाता सती भवती गार्गी स्वयं पप्रच्छ, अत्र तत्रभवता याज्ञवल्क्येनैव वेद वचनानु-वादेऽप्यनधिकृतेति तिरस्कृतानारी सैव सम्प्रति तत्सम्मुखे प्रति पक्षिरूपेणवेदविषयके एव विवादार्थं स्वयमुपस्थिता गार्गीति विशिष्टं सन्निदर्शनं परं सर्वाश्चर्यास्पदंच भवतीति प्रतीयते।

तद्यथा—"साहोवाच-अहंवैत्वायाज्ञ! यथा काश्योवावैदेहोवा उग्रपुत्रः उज्ज्यंधनुरधिज्यं कृत्वा द्वौ बाणवन्तो सपत्नातिव्याधिनौ हस्ते कृत्वा उपोत्तिष्ठेद् एव मेवाहंत्वाद्वाभ्यां प्रश्नाभ्या-मुपोदस्थाम् तौ मे ब्रूहीति, पृच्छ गार्गीति" इत्यादि। (बृ० उ० ३, ८, २—१२) "सहो

वाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति-अस्थूल-मनणु०—"एतस्य वा अक्षरस्य प्रशासने सूर्याचन्द्रमसौविधृतौतिष्ठतः० **इत्यादिकं बहुप्रपञ्चं संवृत्तं वाद-विवादान्तरं सुप्रसिद्धमेव, तत्रेदमन्तिमं गार्ग्याः निर्णीतमिदं वचनं भवति,**—"साहोवाच ब्राह्मणाः भगवन्तः तदेवबहु मन्येध्वं यदस्मान् नमस्कारेण मुच्येध्वम्, न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति, ततोह-वाचक्नवी उपरराम ॥

(बृ० उ० ३, ८, १२)

अत्रेदं महदाश्चर्यकरं महतां विदुषां सभायां ब्रह्मनिष्ठस्य परीक्षार्थं काचित् कुमारी-नारीमणिरेव समर्था बभूवेति ततोऽपि प्राचीनतमाः ऋगादिमन्त्रदर्शनेनवसिष्ठ-वामदेवादिवदेव ऋषित्वं प्राप्ताः वह्व्यः ऋषिकाः स्त्रियः अपि ऋग्वेदेप्रसिद्धाः, अनुश्रूयन्ते, ताः पुनरनुस्मर्यन्ते च सर्वानुक्रम सूत्रमुखेन,—

"अहमष्टौ वागाम्भृण्यात्मानं तुष्टाव"

(ऋ० १०, १२५, १-८)

"उदसौषट्पौलोमीशच्यात्मानं तुष्टाव"

(ऋ० १०, १४९, १-६)

"श्रद्धयाश्रद्धाकामायिनी श्राद्धमानुष्टुभम्"

(ऋ० १०, १५१, १-५)

"आयं गौः सार्पराज्ञी आत्मदेवतम्"

(ऋ० १०, १८९, १-३)

इत्याद्याः, ताश्च ब्रह्मवादिन्यः प्रसिद्धाः ॥

"गोधाघोषा विश्ववाराऽपालोपनिषन् निषत् ।
ब्रह्मजायाजुहूनीमा अगस्त्यस्य स्वसाऽदितिः ।
इन्द्राणीचेन्द्रमाता च सरमा रोमशोर्वशी ।
लोपामुद्रा च नद्यश्च यमीनारी च शश्वती ।
श्रीर्लाक्षासार्पराज्ञीवाक् श्रद्धामेधा च दक्षिणा ।
रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः" ॥

इति ॥ (ऋ० परिभाषा० सू०)

तथैव उपनिषदि अन्याः ब्रह्मवादिन्यो विद्यन्ते, प्रसिद्धा ब्रह्मन्तत्त्वोपदेशार्थं समर्थाः, तथाहि "मतस्मिन्नेवाकाशे स्त्रियमाजगामबहुशोभमानामुमाँ हैभवतीं ताँ होवाच किमेतद् यक्षमिति । (के० उ० ३, १२) "साब्रह्मेतिहोवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव विदाञ्चकार ब्रह्मेति" **इति** (के० उ० ४।१) **इत्यादि सङ्क्षेपः ।**

तत्रत्यानि तान्येतानि मन्त्रोपनिषदादीनि-दर्शनानि वसिष्ठ-वामदेवादीनां दर्शनेन समा-नान्येव भवन्तीत्यभिमन्यन्ते, तथा प्रयुञ्जते च याज्ञिकाः यज्ञीय कर्म विनियोगादौ तान् मन्त्रान् स्त्रीणां दर्शनोदितानपि समानगौरवादिभावेनेति प्रसिद्धम्, । अथ पुनः अस्मिन्नेव अवान्तरेण प्रकारान्तरेण केषांचिदाक्षेपः "अष्टवर्षं ब्राह्मणमुपनयीत" **इत्यत्र पुँल्लिङ्गशब्देन तदुपनयन विधानात् स्त्रीणां तत् प्रतिषिद्धमिति अर्थाद्गम्यते इति, तथाऽस्तु, तर्हि-पुराकल्पेतु तदा तादृशं**

निषिद्धाचरणं कथं प्रवृत्तमासीत् इति निर्वक्तव्यमापतति, तस्मात् एतादृशेषु विधानेषु पुँल्लिङ्गादिकं कारणं नैव भवितुमर्हति, तथा निषेधविषयेष्वपि तत्समानमेव, पुरुषशब्देन क्वचित् स्त्रीपुरुषयोः सामान्येन निर्देशस्य अन्याय्यत्वाभावात् । यथा च "जायमानो वै ब्राह्मणस्त्रिभिऋणवान् जायते" इति ब्रह्मचर्येण ऋषिभ्यः यज्ञेन देवेभ्यः प्रजया पितृभ्यः" इति च, श्रुतिप्रसिद्धम्, तत्र देवानां ऋणापाकरणार्थं विहितो यज्ञः, तथा पितुः ऋणापाकरणार्थं विहिता धर्मप्रजा सिद्धिश्च न केवलेन पुरुषेण सम्पादयितुं शक्यम् इति वस्तुसिद्धमेवेतिनिर्विवादम् तद्वदेव "जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते" इति एवमादिषु पुँल्लिङ्गेनैवनिर्दिष्टोऽपि स्त्रीपुरुषयोरुभयोरपि सामान्येन सङ्ग्राहक इत्येववक्तुं युक्तं मन्ये । अन्यथा विशेषेण पुरुषस्यैव तद् युक्तं "जन्मना शूद्रत्वम्, संस्काराद् द्विजत्वं" चेति यदि अभ्युपगम्येत-तर्हि तदातु स्त्रीणां तत् नास्तीति वक्तव्यम्, तथा चेत्—स्वतः सिद्धं तासां द्विजत्वं जन्मतः एवेति सम्पद्यते, अथवा सा शूद्रिणीव स्थिता असंस्कृताच द्विजानां कथं विवाहयोग्या भवेदित्यपि चिन्त्यमेवेति पुनरापद्येत,

अथ स्त्रीणां मन्त्रोपदेशात् तन्मन्त्रशक्तिरेव विनश्यति, तथा तदुपदेष्टाऽपि पापमेव प्रत्यक्षं प्रविशति इति च निर्दिश्यते, यथा देवयान्यै मन्त्रोपदेशात् सञ्जीविनी मन्त्रस्य पुनर्जीवनीयशक्तेर्विनाशो बभूवेति उपदिष्यते पुरातनेतिहासमुखेन, तेन च तत्र सर्वतन्त्रस्वतन्त्रः सर्वेष्टसाधनसमर्थोऽपि शुक्राचार्यः हतवीर्यः सद्य एव सम्बभूवेत्यपि प्रतिश्रूयते ।

ततोऽपि विशिष्टतरः महदनिष्टकरः सर्वानर्थपरः नरकपतनादिदुरिष्टदुरन्तफलप्रदः स्त्रीणां गायत्रीमन्त्रोपदेशः इति श्रूयते, तथाच नरसिंहनापिन्युपनिषदि स्त्रीणां वेदमन्त्रोपदेष्टा घोरतरे नरके पततीति उपदिष्यते, तत्तुश्रेष्ठं प्रमाणम् उपनिषदुक्तत्वात्, अपि च "स्त्रीशूद्र द्विज बन्धूनां त्रयी न श्रुतिगोचरा" इति यत्र मन्त्रान् श्रोतुमपितासामाधिकारो नास्ति तत्र कथं तत्पठनेऽधिकारः स्यात् एतत् सर्वमपिप्रत्युक्त मिवैवेति सिध्यति, कुतः—यदा तु स्त्रीणां तत् उपनयनादिकं प्रत्यक्षं प्रचलितमेवासीत् तदा एतेषां वचनानां का गतिः आसीत्, कथं तत्सङ्गतिः बभूव इति च, "पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते" इत्यनेनैव वचनेन गतार्थतेति भावः, अथवा अन्येषां काम्यानां पौराणिकानां तान्त्रिकाणां मन्त्राणामुपदेशो निषिद्ध इति प्रत्येतव्यम्, न तु द्विजत्वादिसिध्यर्थानां नित्यकर्मानुष्ठानाद्युपयुक्तानां मन्त्राणामुपदेशपरः स प्रतिषेधः इति ज्ञेयम् ।

अपि च स्वस्वसन्तानस्य द्विजत्वं कामयमानाः पुरुषाः शूद्रवद् असंस्कृतायाः शूद्रसमानायाः तस्याः स्त्रियः सकाशात् कथं ब्राह्मणादि धर्मप्रजाभ्युदयं अधिगन्तुमर्हेयुरिति त एव प्रति प्रष्टव्याः यतः सजातीयाभ्यां दम्पतीभ्यामेव तत्सजातीयप्रजासम्भूतिसत्त्वनियमात्, तद्यथा ब्राह्मण्यांजातो ब्राह्मणो भवति" इति मन्वादिधर्मशास्त्रविधानात् तद्गम्यते, अन्यथा विजातीयप्रजायां सङ्करजातित्वाभ्युपगमाच्च, निषाद-पारशवादिसञ्ज्ञया तेषां द्विजातिभ्यः चातुर्वर्ण्याच्च पृथक्त्वेन निर्देशात् ।

तदेतद् याज्ञवल्क्यस्य वचनेनैव सिध्यति, तस्यैतत् नाभीष्टमिति, "यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः । नैतन्मम मतं यस्मात् तत्रायं जायते स्वयम्" इति स्पष्टार्थकं वचनम् ।

अपि च जातकर्मादिसंस्कारविधायके आश्वलायनादिगृह्यसूत्रेषु "आवृतैव कुमार्याः" इति सूत्रं बहुवारं प्रत्येकस्मिन् संस्कारे प्रयुक्तं दृश्यते, तस्य व्याख्यानम्—तूष्णीं—अमन्त्रकं

तत्संस्कारादिकं कुमार्याः कर्तव्यं भवति इति कृतं विद्यते, तदेतदपि तूष्णीमेताः क्रियाः स्त्रीणाम्" इत्यनेन समानम् ।

तत्र कुमारीणां जातकर्मादिसंस्कारे एवम् अमन्त्रकत्व विधानात् उपनयनेऽपितत् समानमेव भवितुमर्हतीति केचिदाहुः, न च एतदपि कल्पयितुं शक्यम् यतः - तत्र जातकर्मादिचौलान्तानां संस्कारकर्मणाम् "आवृतैव कुमार्याः । इति प्रत्येकशः अनुवदन् उपनयने विवाहादौ च नानु ब्रवीति तद्वचनम्, तेनापि एतद्गम्यते—उपनयने अमन्त्रकत्वविधानं काश्वलायनस्य नाभिमत मेवेति,

अथ पुनः यदि उच्येत—पूर्वोक्तस्यैव आवृतैव कुमार्याः इति सूत्रस्य अनुवृत्या उपनयनस्यापि अमन्त्रकत्वविधिरागच्छतीति, तर्हि उत्तरत्रापि विवाहादिषु तदेवानुवृत्तं सत् अमन्त्रक एव सः विवाह विधिरपि स्यात्, तच्च याज्ञवल्क्यवचनेन विरुद्धं भवेत्, "विवाहस्तु समन्त्रकः" इति तस्य स्पष्टार्थकत्वात्, तथा सम्प्रति प्रचलिते विवाहे समन्त्रके तु तद्वचनं निरर्थकमेव भवेत् इति न पुनर्व्यक्तव्यम् ।

वस्तुतस्तु—तत्र विवाह समये सद्योवधूत्वसिध्यर्थं स्त्रीसंस्कारः इति कश्चित् संस्कारः अनुष्ठीयते, कर्मकाण्डीयैर्वैदिकैः पुरोहितैः, तत्रापि अतीतजातकर्मादि लोपप्रायचित्तपूर्वकं कृच्छ्रादिमुखेन एकतन्त्रेण तान् सर्वानपि संस्कारान् संसिद्धान् सम्भावयन्ति, तदानीमेव उपनयन संस्कारोऽपि अमन्त्रक एव निर्वर्त्यते, केचित्तु-मन्त्रपठनमात्रेण तदुपनयनं निर्वर्तयन्ति, तत्रापि क्वचित् बटूनामिवैव कच्छ-कटिसूत्र-कण्ठ सूत्रादिकमपि कुमारीणां सद्योवधूनां धारयन्ति, स्वस्व कुलाचार-देशाचारादि विशेषानुसारेण, तत्र–"जाति धर्मान् जनपदर्धाश्चतान् विवाहे प्रतीयात्" इति आश्वलायनोक्तं गृह्यसूत्रं सङ्गच्छते, सच संस्कारः उपनयनस्थानीय एव भवितुमर्हति ।

"वैवाहिकोविधि स्त्रीणामौपनायनिकः स्मृतः" इति मनुवचनमपि तदेतदेव समर्थयतीति प्रतीयते ।

तत्र सः उपनयन संस्कारोऽपि विवाहे एवान्तर्भवतीति केचिद् वदन्ति, तेनैव उपनयनस्यापि समृद्धिं भावयन्ति, न तु उपनयनाभावं विहितं मन्यन्ते, तदेत देव किञ्चित् समाधान कारणम् । वस्तुतस्तु—तस्मिन् स्त्री संस्कारे उपनयनानुष्ठानमेव युक्ततरमिति प्रतिज्ञायते ।

यथा चौलसंस्कारे कुमाराणां केशकर्तनं क्वचित् मुण्डनमपि शास्त्रविहितम्, "चूडाकार्या यथाकुलम्" इति तदनुस्मरणम्, "यत्रबाणाः सम्पतन्ति कुमारा विशिखा इव" इति च तदनुश्रुतिः, तद्वदेव कुमारीणामपि तत्समानमेव शास्त्रे विहितमपि केचित् न कुर्वन्ति, कन्यानां तेन अश्लीलादि भावनया क्वचित् कुरूपादि दर्शनासम्मतया च, तथाऽपि तूष्णीं अमन्त्रकं मन्त्रपठनादिमात्रेण वा तत्सिद्धिं भावयन्ति, कर्मकाण्डीयानां विदुषां पुरोहितादीनां मार्गदर्शनानुसारेण तदनुष्ठानेन इति विशेषः ।

तस्मात् सर्वात्मना स्त्रीणां उपनयन संस्कारनिषेधः शास्त्रोपदिष्ट इति नैव सिध्यति, यथा कथञ्चित् तत्संस्कारसिद्धि भावनायोगात्, "अकरणादपि मन्दकरणं श्रेयः" इति न्यायात् तथाऽपि तस्मिन् स्त्री संस्कारे विवाहे वा तदुपनयनस्थानीये सद्योवधूभ्यः गायत्रीमन्त्रोपदेशोन क्रियते नापिवेदाध्ययनादिकं कारयन्ति ।

वस्तुतस्तु—"अष्टवर्षा भवेत् कन्या" इति वचनेन तस्याः अष्टवर्षायाः विवाहोऽपि उपनयनस्थानीय एव भवति, "अष्ट वर्षं ब्राह्मणमुपनयीत" इति अष्टमे वर्षे बटूनां तद्विधानात्, तेन तत्समानमेव स्त्रीणामपि भवितुमर्हति ।

तासामपि अष्टमे वर्षे उपनयनेन तथा उपनयन स्थानीयेन स्त्री संस्कारेण वा सद्योवधूत्व सिध्या तद्विवाहकरणं पूर्वाचारपरम्पराप्ताप्तम्, न तु पुनः अष्टमे वर्षे विवाहविधिः शास्त्रादेशात् प्राप्तः, किन्तु उपनयन स्थानीयत्वे नैव विवाहोऽपि प्राप्यते, तथाऽनुष्ठीयते च सद्योवधूत्वसिद्धि योगेनेति तत् समुन्नीयते ।

अपि च उपनयने बटूनां यत् खलु मौञ्जीबन्धनं विहितम् दीक्षाव्रतबन्धादि स्थानीयं कटिसूत्रादिकं च तदपि स्त्रीणां अपि विद्यते इति अनुमीयते, तासां उत्तरत्र दर्शादीष्टि समये योक्तृबन्धनेन तत् समानमिति च गम्यते ।

तथा यज्ञोपतीतमपि तासां मङ्गलसूत्रात् पृथग् भूतेन तदानीमेव सन्धृतेन कण्ठसूत्रेण प्रतीयते, तस्मिन् विषये ततोऽपिमहत् प्रमाणान्तरं भवति, तथाहि—अपुत्रिकायाः विधवायाः हस्तेन पत्युः श्राद्धादिकरणे तस्याः अपि एकं वस्त्रनिर्मितं पाथेयं उत्तरीयवद् धारयन्ति, तच्च तिलतर्पणे पिण्डप्रदानादि समये च सव्यापसव्यादि क्रियायां विनियुज्यते, पुरुषाणां यज्ञोपवीतमिवैवेति कर्मकाण्डिनां पुरोहितानां विदितमेवैतत् तथा तत्तदनुष्ठाने इदानीमपि प्रत्यक्षं प्रचलति इति च, तत् पाथेयवस्त्रं तु वस्तुतः यज्ञोपवीतस्थानीयमेवभवितुमर्हति, केवलस्यवस्त्रस्य तु कण्ठे सन्धृतस्य सव्यापसव्यकरणे विनियोगासम्भवात्, अनौचित्याच्च, ततोऽपि अन्यस्तिकिञ्चित्—तादृशं पाथेयवस्त्रं कण्ठे तद् वस्त्रं संस्थाप्य तस्य सव्यापसव्यकरणार्थं विनियोगोऽपि क्वचिद् दृश्यते, महाराष्ट्रादि प्रदेशान्तरेषु, तदेतदपि तासां यज्ञोपवीत सत्त्व स्यैव बोधकं लिङ्गं भवति ।

तासां पत्युः मरणानन्तरं केशवपनादिनां कण्ठ सूत्रस्य तथा मङ्गलसूत्रस्यापि परित्यागेन कङ्कणादि विसर्जनेन माङ्गल्यस्य च कुङ्कुमादेः परिमार्जनेन सन्यासिवदेव संवृत्तानां तासां पुनः पाथेववस्त्रबन्धनेन श्राद्धानुष्ठापनेन च गम्यते पूर्वाश्रमे अर्थात् गार्हस्थ्ये तासां यज्ञोपवीतादिकं धारयितुं आसीत् सत्त्वमिति ।

अपि च आत्यन्तिकमेकं प्रमाणान्तरमप्यस्ति तासां वैदिकसंस्कारसत्त्वे समानम्, यत् स्त्रीणामपि अन्त्येष्टि विधानम्, तदपि वैदिक मन्त्रमुखेनैव, तच्च विधवाया अपि समानतन्त्रेणव भवति, सम्प्रत्यपि तत् प्रचलति, इति प्रत्यक्षसिद्धमेवैतत्, "असौस्वर्गायलोकाय स्वाहा" इत्यादिभि मन्त्रैः ।

तस्याः शरीरस्य हवनेन यज्ञ भावनाऽपि शास्त्रविहितैव, नात्र पुरुषाणां अन्त्येष्टया समानैव भवितुमर्हति, तत्र तस्मिन् अन्त्येष्टियज्ञे यस्याः शरीरस्य हवने निर्जीवशवस्य दहने ये वेदमन्त्राः प्रयुज्यन्ते यज्ञत्वसिध्यर्थम्, तेषामेव वेदमन्त्राणां श्रवणे उच्चारणे जीवन्त्यास्तस्याः नास्ति अधिकारः इति शोचनीयमेवैतत् इत्यपिचिरं चिन्तनीयतया नित्यमापतितमेव, तदेतत् सर्वमपि स्त्रीयं दौर्भाग्यं स्वकीयानां दौर्बल्यं दौर्मनस्यं च याथार्थ्येन समर्थयितुमपि मम किञ्चत् लज्जास्पदमेव, किञ्चिद् भीतिप्रदं च, यतः एतदनुश्रुत्य लोकाः समुद्विजेरन् इति, केचित्खिद्येयुः केचित् कुप्येयुरितिच वहुविधेन भावेन, वेदतदपि आस्तां तावत् एवं सत्यपि विदितैरपि याथार्थ्ये

न तस्मिन् विषयेविदुषां लोकैषिणामपि तत्रभूयोऽपिवृथैवाभिमानो जागर्ति, तेन इदानीमपि इतः परमपि तासामुपनयनादिकं नाङ्गीकुर्वन्ति, नापिकर्तुंकारयितुं च प्रवर्तन्ते, नापि तासां वैदिक विद्यायां प्रवृत्ति समुन्नतिं च कामयन्ते, नानुमन्वते, पुरुषैरेवतत्पुत्रैः स्वस्वमातृणां स्त्रीणां पुत्राणां स्वसृणां च शूद्रपङ्क्तौ समावेशः क्रियते, एवावत् पर्यन्तं ता एताः शूद्रवदेव भाविताः यासां द्वारैव पुनः असंस्कृतानां शूद्रिणीनामिव संवृतानां अज्ञानां अबलानां दुर्वलेभ्योदेहेभ्यः दुर्दैवापहृतेभ्यो हृदयेभ्यश्च विद्यादिविरहरुक्षेभ्यः सुवीर्याणां विदुषां स्वतन्त्रहृदयानां च पुत्र-पौत्रादीनां उदयं तथा तेषामुत्तरत्र बहुधाऽभ्युदयं कथमिव कामयन्ते जनाः, कथं वा तत् पुनः प्राप्तुं शक्नुयुरिति चिन्त्यमेवैतत् मनोरथमात्रमिति। अपि च अस्माकं भारतीयानां सा आर्षेयी-वैदिकी संस्कृतिः वीजक्षेत्रादि परम्परा धारया काचिद्दिव्या भव्यामहती इति च महतागौरवेण मन्यमानाः सभायां व्याख्यामः तद्गाम्भीर्यं महत्त्वं च वर्णयामः वचनमात्रेण, तदवीजानु रूपं फलमुत्पद्यमानमपि क्षेत्रानुगुण्यमूलमेव भवितुमर्हतीति सर्वेषामपि प्रत्यक्ष सिद्धमेव,

तस्मादेव कृषीवलाः बीजावापार्थं प्रथमतः क्षेत्रमेव संशोधयन्ति, संस्कुर्वन्ति च गोमूत्र-गोमयादिना पवित्रेण द्रव्यविशेषेण प्रक्रियादिना च, तस्मिन् संस्कृते पवित्रे क्षेत्रे समुप्तंबीजं महते भूयसे फलोदयाय कल्पत इति मन्यन्ते, तथा पुनरनुभवन्ति च तत्फलं पूर्णम्, तद्वदेव धर्म-प्रजोदयार्थं तेषां ब्राह्मीशरीरसम्पत्यर्थं च गर्भत एव वैदिकाः लौकिकाश्च संस्काराः शास्त्र-विहिताः प्रसिद्धाः,

"गार्भैर्होमैर्जातिकर्म चौलमौञ्जीनिबन्धनैः।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥"

इति॥ (मनु० स्मृ० २,)

तदेवं श्लोकादिश्रवणमात्रेण सन्तुष्टा विद्वांसोऽपि न प्रवर्तन्ते कार्यमुखेन तदनुष्ठातुम्, नाप्यविलषन्तीति च विषादास्पदमेव, तत्र कस्मात्कारणात् एकस्मात् संस्कारात् प्रधानात् उपनयनादेव सत्क्षेत्रभूताः सर्वा अपि स्त्रियो वञ्चिताः असत्कृताः असद्भाविताश्च, अतएव तासां एतासां असंस्कृतानां अवैदिकसत्त्वयुक्तानां स्त्रीणां शरीरेभ्यः समुद्भूताः सर्वेऽपि वयं तत्तदनुरूपाः तदनुगुणा एव भवामः, तदेतत् सत्यमेवोक्तम्—

"जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते" इति,

ततश्च उत्तरत्र जातकर्म संस्कारैः उपनयनादिभिश्च पुनः-द्विजत्वसिध्या दिव्यभावोदयं मन्यन्ते "तदेतत् सार्वजनीनमिति प्रतीयते सामान्यतोनिर्दिष्टत्वात्, तेन स्त्रीणामपि तत् समान-मेवेति गम्यते, केचित्तु-एतदाक्षेप विषयस्यनिरवकाशत्व साधनार्थं "जन्मना जायते शूद्रः" इति वचनमेव धर्मशास्त्रे न विद्यते इति वदन्ति, तथाऽस्तु का हानिः, न तावताकाचितापत्तिः, तद्वचनाभावेऽपि तद्विषयस्य तु अस्तित्वं यथार्थत्व च कथं केन वा वारयितुं शक्यम्, तस्यवस्तु-सिद्धत्वात्, तत्तुजातमात्रस्य सर्वस्यापि समानमेव असंस्कृतत्व स्वरूपम्, अद्विजत्वम्, वैदिक-संस्काराकरणे द्विजत्वसिध्यसम्भवात् तासां द्विजेन सह विवाहयोग्यताऽपि न सम्पद्यते, इति वस्तुसिद्धमेवैतत्, अपि च यत्र कन्यानां वैदिकसंस्काररहितानां द्विजत्वाभावात् तत्संस्कार विना तासां विवाहानर्हता शास्त्रदृशा विहिता, तथा उत्तरत्रापि तासां वैदिकयज्ञादि धर्मे धर्म-प्रजादिसिद्धये अयोग्यताऽपि स्वतः सिद्धैव, अतः ब्राह्मीविवाहादिनातद्योग्यता सम्पादनीयेति सिध्यति, येन सा तत्सन्तानानां ब्राह्मीशरीरोदये कारणीभूता, क्षेत्र संस्कृतिरूपा, तद्वीजादि-

पवित्रीकरणसमर्था, सुवीर्यत्वादि सत्त्वसम्पादनार्था च भवेदिति, तदेतदुक्तम्—"ब्राह्मीयं क्रियते तनुः" इति,

तस्मात् तदेतत्सर्वदोषादिनिवृत्तिद्वारा द्विजत्वादियोग सत्त्वसिध्यर्थं मातृवर्गाणामपि उपनयादि संस्कारपूर्वकं वैदिकविद्यायाः अवलम्बनं यज्ञादिसत्क्रियाश्रयणं सद्धर्माचरणमेव सर्वथा-शरणमिति निर्णीयते ।

अत्र दिव्यसत्त्वपूर्णा परमपवित्रा सर्वतन्त्रस्वतन्त्रा गायत्रीमन्त्रात्मिकैव सर्ववैदिक संस्कृति मूलमात्रा सर्वार्थसिद्धये प्रभवतीतिवेदोपनिषदादि सर्वशास्त्रसिद्धान्तः ।

तत्रापि सद्योवधूत्व सम्पत्तये उपनयन संस्कारपूर्वकं विवाहादनन्तरं वेद विद्यादिज्ञान सङ्ग्रहणार्थं प्रयतितव्यम्, अथवा ब्रह्मवादिनीत्वयोगेन उपनयनादनन्तरं वेदविद्यादि समाप्त्या विवाहेन गार्हस्थ्याश्रयणेन सर्वं अभीष्टार्थं साधयेदिति विवेकः ।

तस्मादिह भारतीय संस्कृतौ सर्वस्मात् प्रधाना गायत्रीमन्त्रमुखेन वैदिकी संस्कृतिः उपनयनादिरूपैव मूलभूतेति सम्पद्यते ।

तस्मिन्नेव विनष्टे प्रधानसंस्कारे सा दिव्या सूक्ष्मतमा वैदिकी आर्षेयी संस्कृतिः कथञ्चि-दपि नैव स्थातुं शक्नोति, इति प्रतिज्ञायते, "छिन्ने मूले नैव पत्रं न शाखाः" इति वदेवेति गम्यते ।

तस्मात् सोऽयं गायत्री मन्त्र एवास्माकं सर्वेषामपि कल्याणाय समुद्धरणाय श्रेयः समृद्धिफलाय निःश्रेयसाय च हेतुभूतः मूलाधरभूत इति च सर्वं सम्पद्यतेतराम् ।

।। इत्येषा षष्ठीकला सम्पूर्णा ।।

॥ षष्ठी कला ॥ (६)

॥ पुराकल्पे स्त्रीणां गायत्रीमन्त्रोपदेशसत्त्वम् ॥

लोके स्त्री-पुरुषौ समार्धवपुषौ हृद्योगतो दम्पती
नाके शक्ति-शिवौ च मातृ-पितरौ तौ क्षेत्रबीजात्मकौ ॥
स्त्री वामा रससोमसत्त्वनयना क्षेत्रात्मिका रस्यभूः
दक्षस्तैजसदिव्यसूर्यनयनो बीजात्मकः पूरुषः ॥ १ ॥

सूर्याचन्द्रमसाविव प्रभवतस्तेजोरसैकात्मकौ
बीजक्षेत्रमयौ स्वसन्ततिमुखाद् विश्वैकसञ्चालकौ ॥
सृष्टेराप्रलयं समानकलया स्यातां मिथः सङ्गतौ
शक्तौ स्त्रीपुरुषौ समस्तविषये प्रापञ्चिकेऽर्थेऽन्वितौ ॥ २ ॥

वेदाद् दिव्यसुसंस्कृतेः प्रगतितो दिव्यद्विजत्वाप्तये
साजात्येन च वेदधर्ममुखतो ब्राह्मीविवाहादिभिः ॥
योगाद् यज्ञकृतेः कृते व्रतमुखाद् (ब्राह्मी) धर्मप्रजासिद्धये
प्राधान्यादुपनायनं तदुभयोः स्याद् वैदिकी संस्कृतिः ॥ ३ ॥

॥ ब्रह्मवादिनी ॥

गायत्र्याः परवेदमन्त्रमुखतो ब्रह्मोपदेशात् स्त्रियः
स्वाध्यायाध्ययनाद् धियां सुनियमात् सद्ब्रह्मचर्यव्रतात् ॥
ज्ञानान्मानवती हृदा च वयसा प्रौढा सुविद्यादिना
पश्चादेव विवाहतश्च गृहिणी स्याद् ब्रह्मवादिन्यसौ ॥ ४ ॥

॥ सद्यो वधूः ॥

पूर्वं शास्त्रविधेः कृतोपनयना ब्रह्मोपदेशादिना
वेदादेर्व्रतधारणात् सुनियता सद्यो वधूः सा भवेत् ॥
उद्वाहात् सहचारिणी स्वपतिना यज्ञादिधर्माश्रयात्
पश्चाद् वेदमुखेन चाभ्यसनतस्तिष्ठेद् गृहस्थाश्रमे ॥ ५ ॥

॥ आक्षेपः ॥

नारीणामुपनायसंस्कृतिरियं नास्त्येव सर्वात्मना
नो वेदाद्यधिकारसत्त्वमुचितं नो देवयज्ञादिकम् ॥
पत्युः सद्वचनात् तथाऽनुसरणात् सेवैव सर्वार्थदा
प्रत्यक्षं भुवि तत् प्रपञ्चविषये शास्त्रीयसत्साधनम् ॥ ६ ॥

॥ समाधानम् ॥

सेवायाः सुविधानतः प्रथमतः संस्कारहानिः कथं
संस्कारादिह वैदिकोपनयनात् सिद्धे द्विजत्वे ततः ॥
उद्वाहेन तयोर्मिथः सहृदयाज् जायापतित्त्वे स्थिते
पश्चादेव विधेर्भवेन्नियमतः पत्युश्च सेवा गतिः ॥ ७ ॥

॥ पुराकल्पे तु नारीणामुपनयनम् ॥

नारीणामपि चेष्यते भुवि पुराकल्पे श्रुतेः संस्कृतिर्
मौञ्जीबन्धनतस्तथोपनयनं सद्धर्मसंसाधनम् ॥
गायत्र्याः परवेदमन्त्रमुखतो ब्रह्मोपदेशः परः
स्याद् वेदाध्ययनादिकं श्रुतिमुखात् सर्वं समानं स्त्रियः ॥ ८ ॥

तत्रापीप्सितवर्तमानकृतितो योगेन सत्प्रत्ययात्
सत्त्वात् सन्ततमिष्यते द्विजकुले तत् सार्वकालोचितम् ॥
संस्काराकरणं गुणादिकरणं स्यादित्यपि भ्रान्तिजं
यत् पुंसामपि तत् समानमुचितं सद्वेदसत्त्वादिकम् ॥ ९ ॥

एवं सत्यपि नेष्यते सुमतिभिः श्रद्धालुभिर्वैदिकैर्
विद्वद्भिश्च सनातनैः श्रुतिपरैः सद्धर्मकर्मार्थिभिः ॥
धर्मोऽयं हि सनातनः श्रुतिपरो युक्तोऽत्र सर्वाश्रये
सद्धर्माचरणे च देवयजने धर्मप्रजासिद्धये ॥१०॥

॥ प्रकारान्तरेण समाधानान्तरम् ॥

यद्येवं कृतितः पुरा प्रचलितादासीदिति प्रोच्यते
तत् केन प्रतिषिद्धमाचरणतः कस्मादकस्मात् कथम् ॥
स्मृत्यादौ च कलौ निषिद्धविषये कुत्रापि नो दृश्यते
शास्त्रेषु प्रतिमृग्यमेव वचनं नाद्यापि तल्लभ्यते ॥११॥

॥ अवान्तराक्षेपसमर्थनम् ॥

तत् केचित् पुनराहुरान्तरदृशा साक्षान्मतिप्रत्ययात्
स्त्रीणां तत्र रजस्वलादिसमये गर्भे प्रसूत्यादिके ॥
आशौचात् प्रतिबन्धनादनुचितात् कर्तुं ह्यशक्यात्पुरा
केनापि प्रतिषिद्धमेतदखिलं तद् वेदधर्मादिकम् ॥१२॥

नैतद् युक्तिसहं प्रयुक्तवचनं न स्यात् प्रमाणास्पदं
नित्यं तत्तु समानमेव सकलं कल्पान्तरेऽपि स्थितम् ॥
संस्कारेषु तदेकमेव हि कथं स्यात् सर्वथा बाधकं
संस्काराद् रहिता तु धर्मकरणे सा स्त्री कथं युज्यते ॥१३॥

पुंसां स्त्री सुखदा समस्तविषये योगे च भोगे प्रिया
पाकादौ निजगेहकृत्यकरणे सेवासु सन्तानके ॥
सद्धर्मे परसत्त्वशुद्धिमुखतो देवाधियज्ञादिके
सर्वेष्टेयमसंस्कृताऽपि च कथं नारी समर्था भवेत् ॥१४॥

॥ पुराकल्पस्य वास्तविकं अर्थान्तरम् ॥

सच्छास्त्रादिह वस्तुतस्तु स पुराकल्पः स्मृतेः श्रावितः
तस्याः पूर्वतनः पुरातनतमः श्रौतः सकल्पो भवेत् ॥
श्रौते यज्ञमुखे सदा श्रुतिविदां स्त्रीणां च यज्ञार्हता
तासां वैदिकसंस्कृतेः प्रगतितो वैशिष्ट्यसत्त्वोर्जिता ॥१५॥

स्त्रीणां पत्युरसन्निधावपि समं स्यान्नित्यहोमादिकं
दर्शादीष्टिमुखे तु देवयजनं तद्वेदमन्त्रादिभिः ॥
श्रौतेऽग्नौ विहितं व्रतादिहवनं मन्त्रैर्हविःसाधनं
श्रौते कर्मणि सम्प्रवृत्तिरुचिता सम्प्रत्यपि स्यात् समा ॥१६॥

आज्यावेक्षणयोक्तृबन्धनविधौ भूयस्त्वसम्पत्तये
तन्मन्त्रैरनुमन्त्रणं श्रुतिविधेरद्याप्यनुष्ठीयते ॥
सिद्धाः "सुप्रजसो वयं" गृहपतेः पत्न्योऽध्वरे सादराद्
"अग्नि त्वामुपसेदिमेति" वचनं श्रौतं यजुर्मन्त्रकम् ॥१७॥

नारीणामुपनायनं श्रुतिमुखान्नास्तीति वै स्वस्मृतेर्
नित्यं सम्प्रति बोधयन् निजमुखात् तद् याज्ञवल्क्यो मुनिः ॥
मैत्रेय्यै परसंविदोपनिषदा "द्रष्टव्य आत्मेति" वै
मैत्रीभावत आदिदेश परमं तत्त्वं भवान् वेदवित् ॥१८॥

राज्ञः श्रीजनकस्य सत्रयजने विद्वत्सभासम्मुखे
भूयो ब्रह्मविदः परीक्षणकृते वृत्ते विवादोन्मुखे ॥
गार्ग्यै तत् परमं निजोपनिषदां तत्त्वोपदेशात् स्वयं
ब्रह्मैवाक्षरवस्तुसत्यममृतं सम्बोधयामास सः ॥१९॥

प्राचीनास्तु ऋषिस्त्रियः श्रुतिविदस्ता ब्रह्मवादे रता
मन्त्राणामपि दर्शनेन ऋषिका गोधा च घोषादयः ॥
तासां वैदिकमन्त्र-सूक्तनिचयास्तत्त्वादिबोधोच्चया
ऋग्वेदे बहुधा श्रुता बहुमता मन्वादिदृष्टैः समाः ॥२०॥

॥ पुनराक्षेपः ॥

तस्मिन् ब्राह्मणमष्टवर्षमिति वै पुँल्लिङ्गनिर्देशतः
स्त्रीणां नास्त्यधिकार इत्यपि पुनः केचिद्वदन्ति श्रुतेः ॥

इत्थं चेत् कथमिष्यते खलु पुराकल्पे तु तस्य स्थितेर्
नो लिङ्गादिकमत्र कारणपदं वर्णप्रधानार्थकम् ॥२१॥

तद्वद् वै नरके भवेन्निपतनं मन्त्रोपदेष्टुः स्त्रियां
नश्येन्मन्त्रगदिव्यशक्तिरिति तत् स्याद् देवयान्यामिव ॥
स्त्रीणां वै श्रुतिगोचरैव न भवेत् सा च त्रयीत्यादिकं
व्याख्यातं सकलं पुरैव हि पुराकल्पे तु तत्सत्त्वतः ॥२२॥

स्त्रीसंस्कारविधेस्तदोपनयनं तूष्णीममन्त्रात्मकं
प्रायश्चित्तिविधानपूर्वकमदः सद्भावतः कार्यते ॥
दीक्षार्थेन हि कण्ठसूत्रमपि तद् यज्ञाय सन्धार्यते
सोद्वाहाय यथा कथञ्चिदपि वा सत्संस्कृता भाव्यते ॥२३॥

यज्ञादौ प्रतियोक्तृबन्धनमदो मौञ्जीपरं गम्यते
श्रौतत्वाय समन्त्रकं सुविहितं तद्योग्यतासिद्धये ॥
पत्युः श्राद्धकृते धृतं विधवया पाथेयवस्त्रात्मकं
स्यात् सव्यादपसव्यतश्चकरणाद् यज्ञोपवीतार्थकम् ॥२४॥

अन्त्येष्टिः क्रियते स्त्रियामपि विधेस्तैर्वेदमन्त्रैर्यदा
श्रौतेऽग्नौ विहितं शरीरहवनं पुंसामिव स्यात् समम् ॥
यस्यास्तच्छवदाहसंस्कृतिकृते मन्त्रः श्रितो वैदिको
जीवन्त्यास्तु न चाधिकार इति हा ? तच्छोचनीयं सताम् ॥२५॥

एवं सत्यपि तत्र वेदविदुषां भयोऽभिमानो वृथा
न स्त्रीणामुपनायनाद्यनुमतिर्नो वेदविद्योन्नतिः ॥
हा ! हन्त ! प्रतिपातिताश्च पुरुषैस्तन्मातरस्ताः स्त्रिय
भूयो वैदिकसंस्कृतेरपहृतेस्ताः शूद्रवद् भाविताः ॥२६॥

याश्छन्दोभिरसंस्कृतोपनयनाः शूद्रत्वमापादिताः
तासामेव शरीरतः पुनरिमे पुत्राः प्रजाताः समे ॥
शूद्रा एव भवन्ति सर्वगुणतस्तेक्षेत्रसत्त्वान्विताः
सर्वं क्षेत्रगुणान्वितं समुदियाद् बीजानुरूपं फलम् ॥२७॥

गार्भैर्होममुखैः सुसंस्कृतिपरैस्तैर्जातकर्मादिभिश्
चूडाकर्ममुखात् तथोपनयनाद् यज्ञैर्महायज्ञतः ॥
ब्राह्मीयं क्रियते तनुः सुकृतिभिर्वेदादिभिः संस्कृतेर्
एकस्मात् प्रमुखाद् इहोपनयनात् सर्वाः स्त्रियो वञ्चिताः ॥२८॥

तस्मादेव हि सम्प्रति प्रजनिताः सञ्जायमानाः समे
जायन्ते भुवि शूद्रवत् प्रकृतयः संस्कारतो वर्जिताः ॥

संस्कारेण हि वेदमन्त्रमुखतो भूयो द्विजत्वोदयाद्
ब्रह्म-क्षत्र-विशो भवन्ति सकला धर्मप्रजासिद्धये ॥२९॥

या कन्या उपनायनेन रहिता नैव द्विजाः स्युः पुनर्
नोद्वाहाय मता विनोपनयनं यज्ञार्हतां यान्ति ताः ॥
ता यज्ञादिककर्मणेऽनधिकृता जायापदे पूरुषैः
शस्यन्ते समसत्त्वतः सुमिलिता ब्राह्मीविवाहादिभिः ॥३०॥

एतद्दोषनिवारणे श्रुतिमुखात् स्वीयप्रजोद्धारणे
स्त्रीणामप्युपनायनं हि शरणं तद्वेदविद्यार्जनम् ॥
मातुः क्षेत्रविशुद्धसत्त्वमहसा सत्सन्ततेर्योगतः
स्यात् सर्वाभ्युदयैकयोगकरणं सा वैदिकी संस्कृतिः ॥३१॥

तस्माच्छास्त्रदृशा विमर्शनदृशा सद्यो वधूयोगतः
स्यादुद्वाहविधौ सहोपनयनं सत्संस्कृतेः कारणम् ॥
तस्यैवाकरणं गुणाभ्युदयदं न स्यात् स्त्रियां सर्वथा
गायत्र्येव हि सर्वसिद्धिकरणे शक्ताऽखिलोद्धारणे ॥३२॥

इति षष्ठी कला
सम्पूर्णा